# Central Sanskrit University

# Shri Raghunath Kirti Campus

# Devprayag

**3.संस्कृतसप्ताहस्य कार्यक्रमः-** संस्कृतमस्माकं सर्वासु भाषासु जननी विद्यते अतः इयं देववाणी, सुरवाणी नाम्नापि ज्ञायते। आचार्यदण्डिना स्वग्रन्थे काव्यादर्शे अस्या भाषाया विषये उक्तम्- "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः।।" इति। संस्कृतं सामान्यजनानामपि भाषा भवेदिति धिया भारतसर्वकारेण प्रत्येकस्मिन् वर्षे संस्कृतसप्ताहस्यायोजनं क्रियते। सर्वासु शैक्षणिकसंस्थासु महोत्सवोयं महतोल्लासेन परिपाल्यते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेऽपि 08.08.2022त:15.08.2022पर्यन्तम् संस्कृतसप्ताहस्य आयोजनमभवत्। तत्र समुद्घाटनावसरे मुख्यातिथित्वेन पौडीजनपदस्य विधायकः श्रीराजकुमारपोरीमहोदयाः, विशिष्टातिथित्वेन बागीचिकित्सालयस्य अधीक्षिका डा.अंजनागुप्तामहोदयाः, सारस्वतातिथित्वेन देवप्रयागस्थायाः नक्षत्रवेधशालायाः सञ्चालकाः आचार्यभास्करजोशिमहोदयाः, अध्यक्षत्वेन च श्रीरघुनाथकीर्तिपरिसरस्य निदेशकाः प्रो.एम.चन्द्रशेखरमहोदयाः समुपस्थिता आसन्। तत्र श्रीपोरीमहोदयेन संस्कृतस्योत्थानाय उत्तराखण्डे जायमानानां कार्याणां विषये चर्चा विहिता। कथं संस्कृतस्य प्रचारो लोके भवितुमर्हति, कथं जनाः संस्कृतम्प्रति आकृष्टा भविष्यन्तीत्युक्तम्। डा-अंजनागुप्तामहोदया शारीरिकविकासाय मानसिकविकासोऽपि आवश्यकः, मानसिकविकासाय च संस्कृतस्य ज्ञानमपेक्षितं भवति, अतः अस्माभिः सर्वैः संस्कृतं नूनमेव पठनीयमिति सा उक्तवती। भास्कराचार्येण संस्कृतस्य पाण्डुलिपीनां विषये विस्तरेण चर्चा कृता, पाण्डुलिपीनामुपरि शोधकार्येण ज्ञानस्य विकासो भविष्यति, अतस्तस्मिन् विषये शोधकार्यस्य महत्यावश्यकता वर्तते इति तेन प्रोक्तम्। अवसरेऽस्मिन् परिसरनिदेशकेनापि स्वविचाराः प्रकटिताः यद्भारतस्य ज्ञाननिधिः संस्कृते एवास्ति। संस्काराणामभावो वर्तमाने दृश्यते यस्माज्जनाः स्वोन्नतिमार्गाद्विचलिताः भवन्ति। चरित्रनिर्माणाय संस्कृतमौषधं विद्यते। अत्र कार्यक्रमस्य सञ्चालनं वेदविभागस्य डा-शैलेन्द्रप्रसादउनियालमहोदयेन विहितम्। अस्य सम्पूर्णकार्यक्रमस्य संयोजका साहित्यविभागाध्यक्षाः प्रो-विजयपालशास्त्रिणः आसन्। तैरपि स्वविचाराः अवसरेऽस्मिन् प्रकटिताः। संस्कृतसप्ताहान्तर्गते नैके कार्यक्रमाः परिसरे समायोजिताः। संस्कृतसप्ताहे नवमदिनांके छात्राणां निबन्धप्रतियोगिता अभवत् यस्याश्च विषयः- 'अमृतमहोत्सवे भारतस्य वैभवम्'आसीत्। तस्यां प्रतियोगितायां नैके छात्राः भागं गृहीतवन्तः, तत्र दीपकनौटियालः शास्त्री-द्वितीयवर्षस्य छात्रः प्रथमं स्थानं प्राप्तवान्। अस्याः प्रतियोगितायाः संयोजकाः न्यायविभागाध्यक्षाः डा-सच्चिदानन्दस्नेहीमहोदयाः आसन्। दशमदिनाङ्के शोधच्छात्रणां शोधपत्रवाचनकार्यक्रमः समायोजितः, तत्र श्रीजीवनचन्द्रजोशिना शोधच्छात्रेण 'समकालिकसाहित्ये यात्रवृत्तपरम्परा' इति विषयमाश्रित्य शोधपत्रवाचनं कृतम्। श्रीभास्करवर्मनमहोदयेन 'अथर्ववेदे निदानसमीक्षणम्' इति विषयमधिकृत्य स्वशोधपत्रं प्रस्तुतम्। पत्रप्रस्तुत्यनन्तरमनेके प्रश्ना अपि निर्णायकैः प्राध्यापकैश्च पृष्टाः, येषाम् उत्तरं शोधच्छात्रैः प्रदत्तम्। अस्य कार्यक्रमस्य संयोजकः डा.अनिलकुमारः, सहसंयोजकश्च पुस्तकालयाध्यक्षः श्रीनवीनडोबरियालमहोदयः आस्ताम्। निर्णायकत्वेनात्र वेदविभागस्य डा.शैलेन्द्रप्रसादउनियालमहोदयः समुपस्थितः। एकादशदिनांके प्रातःकाले संस्कृतशोभायात्रा निदेशकमहोदयेन सह सर्वैः छात्रैः, सर्वैः प्राध्यापकैश्च समनुष्ठिता। इयं च शोभायात्रा संस्कृतस्योद्घोषेण सह श्रीरघुनाथकीर्तिपरिसरात् देवप्रयागस्थं श्रीरघुनाथमन्दिरं यावत्सम्पूर्णदेवप्रयागे निस्सारिता। श्रीरघुनाथमन्दिरं गत्वा परिसरनिदेशकेन अन्यैश्च देवप्रयागस्य वृद्धजनैश्छात्राः सम्बोधिताः। ततः सर्वे उपाकर्मसंस्काराय गंगासंगमे गताः। तत्र परिसरस्य निदेशकानां प्रो.एम.चन्द्रशेखरमहोदयानाम् आध्यक्षे एवं च वेदविभागाध्यक्षाणां डा.शैलेन्द्रप्रसादउनियालमहोदयानां निर्देशने सर्वे परिसरीयाः प्राध्यापकाश्छात्रश्च वेदविहितकर्मभिः उपाकर्मसंस्कारं कृतवन्तः। अस्मिन् दिवसे एव सायंकाले संस्कृतकविसम्मेलनस्यायोजनं परिसरे अभवत्, तत्र कविसम्मेलने मुख्यातिथिरूपेण हेमवतीनन्दनबहुगुणाविश्वविद्यालयात् श्रीनगरात् डा.आशुतोषगुप्तामहोदयाः समागताः। मुख्यकविषु डा.अनिलकुमार-डा.दिनेशचन्दपाण्डेय-डा.जनार्दनसुवेदि-डा.रघु.बी.राजमहोदयाश्चासन्, सर्वे स्वमधुरकाव्यपाठेन आह्लादितवन्तः। अस्य कार्यक्रमस्य संयोजनं डा.शैलेन्द्रप्रसादउनियालमहोदयेन कृतः। चतुर्दशदिनांके समापनावसरे हेमवतीनन्दनबहुगुणाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षाः प्रो.कमलाचौहानमहोदयाः समागता आसन्, ताभिः संस्कृतस्य वैशिष्ट्यम्, संस्कृतसप्ताहायोजनस्यौचित्यं च विस्तरेण प्रतिपादितम्। अस्मिन् अवसरे ये विभिन्नासु प्रतियोगितासु छात्राः भागं गृहीतवन्तः, ते सर्वे सम्मानिताः। परिसरनिदेशकेन सर्वेषां छात्राणां प्राध्यापकानां च कार्यक्रमस्य सफलतायै धन्यवादो विहितः। एवं प्रकारेण संस्कृतसप्ताहः सोत्साहं परिपालितः।